**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 1
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# लीलाशुकस्य भक्तिसिध्दान्ते महत्तता

डॉ. गुरुमध्वातिरूमलाचार्य नवलि
संस्कृतविभागाध्यक्ष:, नूतन विद्यालय पदवी महाविद्यालय:, कलबुरगि।

**Article Info**
**Publication Issue :**
January-February-2024
Volume 7, Issue 1

**Page Number :** 01-02

**Article History**
Received : 20 Dec 2023
Published : 01 Jan 2024

**सारांश:**-लीलाशुकस्य मुक्तिकारणीभूतभक्ते: स्वरूपं नारदभक्तिसूत्रं तथा श्रुतिस्मृत्यादिसिध्दं वर्तते। भगवदपरोक्षज्ञानहेतुभूतभक्ति: मध्यमस्थानीया। परोक्षज्ञानं शास्त्रापरोक्षज्ञानं भवति। तस्य कारणीभूतभक्ति: प्राथमिकीभक्ति:। गुरूमेवाभिगच्छेत् समित्पाणि: श्रोत्रियं ब्रह्मनिष्ठमित्युक्तदिशा शास्त्रे आदरेण नैरन्तर्येणच भगवति भक्तिंकृत्वा शास्त्रापरोक्षं प्राप्नोति मुमुक्षु:। तदनन्तरं तीव्रेण भक्त्युद्रेकेण भगवति, रत:सन् तत: प्रसन्न:सन् परमात्मा अन्तर्हृदये प्रकटो भवति। एतदेवापरोक्षज्ञानमिति शास्त्रे प्रतिपाद्यते। अपरोक्षज्ञानानंतरं 'यमेवैष वृणुते तेन लभ्य:, 'महात्मयज्ञानपूर्वस्तु सुदृढ: सर्वतोधिक: स्नेहो भक्तिरिति प्रोक्ता तया मुक्ति: नचान्यथा' इत्यादि श्रुतिसिध्द भगवदत्यर्थ प्रसादजनकभक्तिर्नाम. 'निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वक: स्वात्मात्मीय समस्तवस्तुभ्यो अनेकगुणाधिक: अन्तरायसहस्रेणाप्यप्रतिबध्दो प्रेमाप्रवाह:' इति-मळखेडनिवासी श्रीमट्टीकाकृत्पादै: (श्रीमज्जयतीर्थश्री मच्चरणै:) स्वीय श्रीमन्न्यायसुधाग्रन्थे प्रतिपादितवन्त:। तदेव मुक्तिकारणमिति निश्र्चयज्ञानवान् लीलाशुक: श्री मध्वाचार्चाणां अवतारपूर्वमेव स्वीयकृष्णकर्णामृते-**"गोपालाङ्गनकर्दमे विहरसे विप्राध्वरे लज्जसे, ब्रूषे गोशतहुकुंतै: स्तुतिशतै: मौनं विधत्से सताम्। दास्यं गोकुलसुन्दरीषु कुरुषे स्वाम्यंच दान्तात्मसु, ज्ञातं कृष्णतवांघ्रिपंकजयुगं प्रेमैकलभ्यं परम् ।।** इति श्रीकृष्णदर्शनानन्तरमोक्षसाधनीभूतभक्ते: स्वरूपं विशदयन् स्वस्य तादृशभक्तिमत्वं प्रकाशितवान् इत्यत्र सन्देहलेशोऽपि नस्यादिति किंचिदुकत्वा पत्रमेनं यत्करोषि इति भगवदुक्तदिशा श्रीकृष्णपदपद्मयो: भक्त्या समर्पयामि।

**मुख्यशब्दा:**- मुमुक्षु:, प्रसन्न:, वेदा:, प्रमेय:, लीलाशुक:, भक्तिसिद्धान्त:, परमात्मा, परमचेतन:।

अदु:खमितरस्सर्वजीवा एव तु दु:खिन:। तेषां दु:खप्रहाणाय श्रुतिरेषा प्रवर्तते।। अनुव्याख्यानोक्त श्रुति वचनानुसारेण ईश्वरस्य स्वतन्त्रत्वात् आनन्दरूपित्वात् तथा प्रकृते: जडत्वात् द्वयो: दु:खित्वं नास्ति। जीवस्यैव दु:खादि। जीवानानामेव दु:खादिनिवारणार्थं बेदा प्रवृत्ता: वर्तन्ते। यावत् बह्मविष्ठितं तावती वाक्, नित्यावेदा समस्ताच-इत्यादि वचनै: वेदानां नित्यत्वं तथा अपौरुषयत्वं सिध्यति।

अत्र नित्यत्वं कूटस्थतया आद्यन्तशून्यत्वं, अपौरुषेयत्वं स्वतन्त्रपुरुषपूर्वकत्वाभावत्वम्।[1] वेदा: कथं वा जीवानां दु:खनिवारणसमर्था: इति प्रश्नस्तु समुत्पद्यते। कुत इत्युक्ते वेदा भगवत्स्वरूपनिरूपण एवं समर्धा न तु तस्य जीवस्य संसारनिवारणे, किमर्थामित्युक्ते वेदानां जडरूपत्वात्। तवर्षं संसारमोचकत्वं तु चेतनस्यकार्य सर्वजीवचेतनानां संसारनिमप्रत्वात् अस्वतन्त्रत्वात् परमचेतनेनैव एतत् कर्तव्यं भवति। परमचेतन: कथं मोचको भवति इत्युक्ते नायमात्मा प्रवचेनन लभ्य न मेधया न बहुना श्रुतेन यमैवेष वृणुते तेन लभ्य: इति वचनानुसारेण भगवान् यं स्वीकरोति तस्यैव संसारात् विमुक्ति:। एतादृश भगवन्तं ज्ञातुं तस्य स्वरूपं किं इति ज्ञातव्यं भवति। तस्य स्वरुपवर्णने समर्था: वेदा: मुख्या, तदनुसारि विद्यमानानां शास्त्रत्वं सिध्दम्। ऋक्यजु: सामाथर्वा पञ्चरात्रमथाखिलं मूलरामायणं चैव शास्त्रमित्ययिते एतादृश शास्त्रवचनै: भगवत्स्वरूपं ज्ञात्वा, तस्य प्रीति संपाद्य, तदर्थं माहात्म्यपूर्वकभक्तिं कृत्वा मुक्तो भवति। भक्तिर्नाम का इत्युक्ते देवस्थानादिगमनं

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

तथारूपाडम्बरं न, किन्तु माहात्म्य ज्ञानपूर्वक सुदृढः सर्वतोधिकः स्नेहाभक्तिरिति प्रोक्ता तया मुक्तिर्नचान्यथा (अनुव्याव्यानवचनं मध्वाचार्य कृत) इत्याकारिका।[2]

एतादृश्यभक्त्या एव सुप्रसन्नो भगवान् अपरोक्षज्ञानं ददाति। अपरोक्षज्ञानी पुनः निरवधिक भक्तिं कृत्वा प्रलयान्ते संसारात् मुच्यते। मुक्तिर्नामापुनर्भवत्वरूपेण स्वरूपरूपानन्दाविर्भावः, एषः शुध्दवैष्णवसिध्दान्तस्य सप्रमाणको प्रमेयः। नारद भक्ति सिध्दान्तनुसारिणो अनेके भक्ताः कृष्णावतार लीलाविनोदकधासु बह्वासक्ताः तथा तस्यैव लीलावर्णने स्वजीवनं अर्पितवन्तः। मध्वाचार्यैः[3] बिल्वमङ्गलसाधुः इति श्लाघनवचनंयंप्रति कृतं सः लिलाशुकेति अपरनामकः विल्वमङ्गलः, कृष्णलीला वर्णने मूर्धन्यः कृष्णलीला कथनव्याजेन लौकिक पारलौकिक विषय समावेशं कृत्वा रसानुभूतिं दर्शीतवान् स्वीय कृष्णकर्णामृते। तत्र श्लोकमेकस्य चिंतनं इदानीं क्रियते।

यः कोऽपि बालकः मात्रा प्रतिदिनं रात्री क्षीरं स्वीकृत्य पिबतिस्म इति चिन्तयन्तु रात्रावैवा क्षीरं दातव्यं इति तस्यगृहे नियमः। एकदा प्रातः बालकस्य मनसि पयः पातुमिच्छा जाता। यदा मातरं सः क्षीरार्थं पृच्छति तथा माता रात्री इत्युत्तरं दास्यति तदा रात्रिः का इति मातरं पृष्ट्वा निशागमनं यदाभवति तदारात्रि इति मात्रोत्तरं श्रुत्वा स बालकः चातुर्येण अक्षिनिमीलनं कृत्वा अन्धकारस्तु आयातः तदर्थं क्षीरंदीयतां इति मातरं पुनः पुनः पीडयति एतत् बालस्य मतिचातुर्यम्। एतत् घटनया प्रभावितो लीलाशुकः कृष्णलीला बालकभाव्याजेनएवं वर्णितवान्

**मातः किं यदुनाथ देहि चषकं किंतेन पातुं पयः**

**तन्नास्त्यद्य कदास्ति वा निशि निशा का वान्धकारेदये।**

**आमील्याक्षियुगं निशाप्युपगता देहीतिमातुर्मुहुः**

**वक्षोजाम्बरकर्षणोद्यतकरः कृष्णस्स पुष्णातु वः।।[4]**

एतादृशश्लोकेन मनोरंजनं अत्यन्तं समर्थरीत्या लिलाशुकः कृत्वा कृष्णपादारिविन्दार्चनेन शैवावयं नखलु तत्र विचारणीयं इत्यादि प्रतिज्ञां कृत्वापि अहं भगवता कृष्णेन अनुगृहीतोस्मि तथैव भवन्तोऽपि कृष्णचरण रसपानेन पूताभवन्तु इति प्रतिपादनार्थं श्लोके वः इति प्रयोगं कृतवान् नचेत् नः इति प्रयोगकरणं स्यात् एतादृश श्लोकव्याजेन लीलाशुकस्य श्री कृष्णलीला कथनम् भक्ति प्रकाट्यकारणत्वेन वर्तते‌ति इति पत्रमेनम् यत्कोरोषीति श्री कृष्णोक्तदिशा[5] श्रीकृष्णपदयोः भक्त्या समर्पयामि।

**सन्दर्भग्रन्थाः-**


1. तत्वसंख्यानटीकावचनम्-श्रीमज्जयतीर्थकृतम्
2. अनुव्याख्यान-श्रीमन्मध्वाचार्यकृत
3. अनुव्याख्यान-श्रीमन्मध्वाचार्यकृत
4. तत्वसंख्यानटीकावचनम्-श्रीमज्जयतीर्थकृतम्
5. श्रीकृष्णकर्णामृतम्-श्रीबिल्वमङ्गलकृतम्